श्री वेंकटेश भुजंगं

श्री वेंकटेश भुजंगं

मुखे चारुहासं करे शंखचक्रं
गले रत्नमालां स्वयं मेघवर्णं |
तथा दिव्यशस्त्रं प्रियं पीतवस्त्रं
धरंतं मुरारिं भजे वेंकटेशं || 1 ||

सदाभीतिहस्तं मुदाजानुपाणिं
लसन्मेखलं रत्नशोभाप्रकाशं |
जगत्पादपद्मं महत्पद्मनाभं
धरंतं मुरारिं भजे वेंकटेशं || 2 ||

अहो निर्मलं नित्यमाकाशरूपं
जगत्कारणं सर्ववेदांतवेद्यं |
विभुं तापसं सच्चिदानंदरूपं
धरंतं मुरारिं भजे वेंकटेशं || 3 ||

श्रिया विष्टितं वामपक्षप्रकाशं
सुरैर्वंदितं ब्रह्मरुद्रस्तुतं तं |
शिवं शंकरं स्वस्तिनिर्वाणरूपं
धरंतं मुरारिं भजे वेंकटेशं || 4 ||

महायोगसाङ्ख्यं परिभ्राजमानं
चिरं विश्वरूपं सुरेशं महेशं |
अहो शांतरूपं सदाध्यानगम्यं
धरंतं मुरारिं भजे वेंकटेशं || 5 ||

अहो मत्स्यरूपं तथा कूर्मरूपं
महाक्रोडरूपं तथा नारसिंहं |
भजे कुब्जरूपं विभुं जामदग्न्यं
धरंतं मुरारिं भजे वेंकटेशं || 6 ||

अहो बुद्धरूपं तथा कल्किरूपं
प्रभुं शाश्वतं लोकरक्षामहंतं |
पृथक्कालालब्धात्मलीलावतारं
धरंतं मुरारिं भजे वेंकटेशं || 7 ||

इति श्रीवेंकटेशभुजंगं संपूर्णं |